# रोचक कणिका

## श्रीकृष्णस्य द्वारका

धन्यं पुण्यनिधानधाम रुचिरं त्वष्टुः कलाकेतनम् ।
सिंधुक्षालितपादपीठममरैः दिव्योपहारैर्वृतम् ॥
नित्यं नंदसुतांघ्रिवंदनधिया देवादिकैः संकुलम् ।
श्रीकान्तं सुखसेवितं यदुपतेः श्रीद्वारकाख्यं पुरम् ॥
*

## कलिप्रभावः

कलिना मलिनीकृतं जगत्
प्रभुरर्थो जगतीह सांप्रतम् ।
ननु धर्मनिषेविणां अहो
दयनीया भगवन् अवस्थितिः ॥
*

## श्रीरामनाममहिमा

पापतापशमनं हरप्रियम्
मारुतेरपि बलप्रदं महत्।
मंगलं सकलसंपदां पदम्
रामनाम जपतां कुतो भयम् ॥
*

## न पुण्यं न वा शांतिः

कर्तव्यमिति यत् कर्म विरसैः क्रियनेऽनिशम् ।
न पुण्यसंचयस्तेन न वा शांतिरवाप्यते ॥
*

## तिलकस्मरणम्

येन स्वराज्यमधिकार इति प्रदिष्टः
मंत्रः स्वराष्टहितकृत् परतंत्रहर्त्रा ।
यः कर्मयोगनिपुणः कृतिपंडितोऽपि
तं लोकमान्यतिलकं तिलकं नमामि ॥
*

## महात्मने नमः

नमस्ते शांतिदूताय महात्मन् सत्यधर्मिणे ।
अहिंसाव्रतिने तुभ्यं राष्टसम्मानकेतवे ॥
*

## गृहं अभ्यागतं प्रति

सुस्वागतं महाभाग
प्रीतोऽस्मि तव दर्शनात् ।
गृह्यतां आसनं साधो
किं प्रियं करवाणि ते ॥

*

## श्रेयान् गृहस्थाश्रमः

अर्थः सार्थकतां धत्ते कामो भवति पावनः ।
सुखं सुभगतां याति यत्र संयमसेवनात् ॥
सेतुर्धर्ममयो मूर्तः श्रेयःपदपरायणः ।
सवार्थसाधनः श्रेष्ठः स गृहस्थाश्रमो मतः ॥

*

## पुण्यास्पदं आश्रमपदम्

मंदं गंधवहो वहत्यविरतं सत्कर्मसु प्रेरयन्।
यत्र स्निग्धदृशा च पश्यति रविः संजीवयन् जीवनम् ॥
यत्राऽऽस्ते विमला सरित् तनुभृतां नो यत्र कोलाहलः ।
श्रेयो मूर्तमिवेदमाश्रमपदं सद्भिः सदा स्पृह्यते ॥

*

## सख्यं सत्संगमिच्छति ।

अदृष्टपूर्वोऽपि समानशीलः
क्षणात् भवत्येव सखा स्वकीयः।
सख्यं च सत्संगसुखं विहाय
कदापि जानाति न किंचिदन्यत् ॥

*

## कृष्णसुहृदः सुदाम्नो विप्रस्य दैन्यसंपन्नं सदनम्

द्वारं निःस्नेहरावं विनमितपटलं कुड्यमुच्छिन्नजीर्णम् ।
ध्वस्तं खातप्रभूतं क्षितितलमपदं भुग्नकाष्ठं प्रकोष्ठम् ॥
नालं यत्राशनं च क्वचिदपि वसनं यत्र दीर्ण विवर्णम् ।
तद् वै श्रीदामगेहं निवसति सदयं यत्र दैन्यं दरिद्रम् ॥

*

## श्रीगुरुमहिमा

सर्वापत्तिनिवृत्त्यर्थं कुरुष्व गुरुचिंतनम् ।
सर्वेषां इष्टकामानां प्रदाता गुरुरेव हि ॥

*

## श्रीगुरुः शरणं सदा

चित्त शुद्ध असो माझे सदाचरणतत्पर ।
अनन्य  भाव गुरुजी ! तुमच्या चरणी जडो ॥

*

## वरं आज्ञापालनं सदा

क्वचित् गुरूणां सुहृदां कदाचित्
राज्ञां तथा बालकबालिकानाम् ।
आज्ञा कलत्रस्य च पालनीया
विचारहीनाऽपि सुखाय लाके ॥

*

## तस्य कर्म न सिध्यति

योऽन्यमेव श्रयेन्नित्यं तस्य कर्म न सिध्यति ।
स एव पुरुषः श्रेयान् यः स्वयं क्लेशमश्नुते ॥
(रामदासकृत ' जो दुसऱ्यावरी विश्वासला....' चा अनुवाद )

*

## मृत्युभूता वयं ननु ।

सर्वत्र कार्मुको मृत्यु ः
अत्र तत्र समन्ततः ।
ऊर्ध्वमन्तर्बहिरधो
मृत्युभूता वयं ननु ॥
( translaion of "Death is here, death is there...")

*

## दूयमानतमाःशब्दाः

शब्देषु दुःखपूर्णेषु लिखितेषूच्चारितेषु च ।
दूयमानतमा ह्येते ' यद्येवमभवत् ' खलु ॥
( translaion of "off all sad words....")

*

## तारुण्य-वार्धक्य

If you wish to be young
in your age bygone,
Enjoy oldness till your
youth remains.
अगर चाहते हो बुढापेमें जवानी ।
जवानीमें बुढापा जरा चखते रहो ॥
यदि वांछसि तारुण्यं वार्धक्येऽपि चिराय ते ।
वार्धक्यमपि तारुण्ये तर्हि भुंक्ष्व क्वचित् क्वचित् ॥
तारुण्यातच वार्धक्य आदरावे कधी कधी ।
वृद्धापकाळी तारुण्य दीर्घकाळ तदा वसे ॥

*

## युध्यते मन एव हि ।

नास्त्रं न चास्त्रधृक् हस्तो न शीर्षं हस्तचालकम् ।

युध्यते, युध्यते किन्तु मनः शीर्षप्रचोदकम् ॥
( translaion of "It is not the gun that fights....")
*

## दिवंगत-प्रधानमंत्री-पंडित-जवाहरलालमहोदयानां प्रशस्तिः--

जवाहर महामात्य राष्ट्रनायक ते नमः ।
आबालप्रियता यस्य शंसिता च महात्मता ॥१ ॥
बहुकल्पं बहुगुणं संपन्नं यस्य शासनम् ।
येन भारतमाहात्म्यं दिगन्ते परिवर्धितम् ॥२ ॥

स्वराष्ट्रैकसेवाव्रतीनां धुरीणः ।
य आस्ते सदा लोकमान्यो महात्मा ॥
स्मृतिः ते स्वधर्मे सदा प्रेरणा नः ।
नमस्ते नमस्ते नमस्ते महात्मन् ॥
*

## पर्यटनगुणाः

यात्रापर्यटणं लोके मतं बहु गुणप्रदम् ।
अनासायं च निर्बाधं तेनाऽऽप्यते महत् ॥१ ॥
धैर्यं च लभ्यते स्वास्थ्यं व्यवहारेषु कौशलम् ।
लोकयात्राऽपि भवति नूनं तेन हितावहा ॥२ ॥
***

**(By: Vaidya Shriniwas P. Hirlekar)**